


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
IJAAS 2019; 1(1): 172-174
Received: 16-05-2019
Accepted: 23-06-2019

**डॉ० उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर,
समस्तीपुर, बिहार, भारत

# कथासाहित्यस्य महत्त्वप्रतिपादनम्

**डॉ० उमेश कुमार मंडल**

**प्रस्तावना**

विभिन्नाचार्याणां मते कथासाहित्यस्य महत्त्वप्रतिपादनम्- एकता बृहत्कथायाऽन्यत: पञ्चतन्त्रेण च ये द्व साहित्यधारे प्रतिनिधीयते भारतीयसाहित्यशास्त्रिण: स्वरूपतस्ते मिथो भिन्न न प्रदर्शयन्ति, अथापि तद्गतसाम्यवैषम्यपरीक्षणेनामुयोरन्योन्यस्वरूपभेद: स्फुटं गृह्यते। ह्यन्तरात्मनि, बाह्याकारे प्रतिपाद्यार्थे च परस्परं भिद्यते। प्रथमस्या कर्तुरुद्देश्य पाठकमनारञ्जनमपरस्या च सदाचारराजधर्मया: शिक्षा दृश्यत। प्रथमस्या रचना सरलगद्यमया वा कथाप्रयुक्तपद्यमयी बाभयमयी वा भवति, अपरस्यास्तु औपदेशिकपद्यैन्तराऽन्तरा विच्छद्यमानन गद्यनैव धृतशरीरा भवति कथाशीर्षकाणि चाप्यस्या पद्यबद्धान्यव भवन्ति। बृहत्कथा प्रतिनिधीयमाने हि कथासाहित्येऽन्धविश्वासा:, लाकप्रचारितानि निबध्यन्ते, पञ्चतन्त्रप्रतिनिधिके कथासाहित्ये तु पशुपक्षिकथाच्छलेन मानवहृदयस्यानुभूतय: सवदनाश्च राजनीतिधर्मनीतिश्च निपुणतरं व्याक्रियन्ते। तस्माद् बृहत्कथादिग्रन्थसाहित्य लोकप्रियकथा: 'इतिनाम्ना, पञ्चतन्त्रप्रमुखग्रन्थसाहित्यं च 'शिक्षैकोद्देश्यकजन्तुकथा:' इतिनाम्ना व्यवह्रियते।

वैदिकसाहित्ये विशिष्य च ऋग्वेदे निरुक्तकथासाहित्यप्राप्यतमे प्रयत्ने निरर्थक:। पञ्चतन्त्रस्य मुख्यलक्षणं तस्य पशुपक्षिकथामयत्वे नीतिशिक्षकत्वमिति तावत् प्रागुक्तम्। ऋग्वद (8, 103) केवलमेकस्मिन् हि सूक्ते यज्ञे मन्त्रान् पठन्ता ब्राह्मणा वांगम क्रन्दद्भिर्भेकै: उपमीयमाना प्रतिभान्ति। अथ ऋग्वेदानन्तरमेतादृशानि क्वाचित्कानि वर्णनानि छान्दोग्योपनिषद्यासाद्यन्ते। हि बाल: सत्यकाम: प्रथम (तुर्याध्याये पञ्चमे खण्ड ऋषभस्य सकाशाद् ब्रह्मज्ञानं प्राप्नोति, तत: (तुर्याध्याये सप्तमे खण्ड हससय सकाशात्, ततश्च (तुर्याध्याऽष्टमे खण्डे, मद्गोः सकाशात् महाभारते पशुपक्षिकथानां प्रारम्भिकं स्वरूपमुपलभ्यते। तथाहि तत्र मार्जारस्य कथा पश्यत य: सतां वेषच्छलेन मूषिकेषु विश्वासमुत्पाद्य सांस्तान् जग्धवान्। मा नाम त्वं सुवर्णाण्डप्रदायिन्या चटकथा हीन: स्या इति धृतराष्ट्र प्रबोधयन् विदुरस्तं युधिष्ठिरादीनां पीडनाद् विरन्तुमावेदयामास। तत्रैव स्थलान्तर चतुर शृगालस्य कथा खल्वधीयते यो वै वृकसिंहादीनां सुहृदां साहाय्येन महती सम्पदां सुखमासाद्य कुटिलमतिबलात् तान् सर्वान् तस्या अंशभागित्वे प्रतारयामास। एतां हि चतुरशृगालकथां श्रावयित्वा श्रावयित्रा 'एव खलु पाण्डवा अतिसन्धातव्या:' इति शिक्षा निष्कृष्यते।[1]

बौद्धधर्मप्रचारोऽस्य साहित्यस्योन्नतये समजायत। वैदिकधर्म इव बौद्धधर्मेऽपि 'पुण्यापुण्य–चरितैर्मनुष्यस्यानेन जीवनैतदेहपातानन्तरं पश्वादियोनि: प्राप्यते 'इति सिद्धान्ते लाकस्य दृढाऽऽस्था समुत्पाद्यमाना दृश्यत। बाद्धजनश्च स्वसिद्धान्तप्रचारार्थ कथासाहित्याश्रयो गृहीत इति तावत् पूर्वमावेदितमेव। तथा च बौद्धजातकग्रन्थेषु बुद्धस्यतरषा च महापुरुषाणां प्राग्भवीयानि चरितानि व्यञ्जयन्त्य: पश्वादिकथा निबद्धा उपलभ्यन्त। भरहतनामक स्थान उपलभ्यमानन बाद्धजातकाना स्मारक साक्ष्यण व 'ख्रीष्टपूर्व द्वितीये शतके एतादृश्य: पश्वादिकथा नितरां लोकप्रिया अभूवन्' इति नि:संसयं सिध्यति। पातञ्जले महाभाष्ये लोकात्तीन् विषयोकृत्योपन्यस्तै: कतिपयैरुद्देशै: (उल्लेखै:) चेदं मतं पुष्टिमेति। अथ कथासाहित्यस्य लक्षणघटक द्वितीयमवयवं नीतिशिक्षणमधिकृत्य तु तावदैतद् वक्तव्यं यद् विपयऽत्र पञ्चतन्त्रप्रणेता नीतिशास्त्रादर्थशास्त्राच्च पर्याप्ता सामग्री संगृहीता इति। कस्यचिद् राज्ञो मूर्खान् पुत्रान् सुखेन नीतिशास्त्रे राजधर्मे, लोकव्यवहारे, आचारविद्यायां च प्रवीणान् कर्तुमेव पञ्चतन्त्रस्य प्रणयनमभूदिति तावत् का स्वयं स्वीकृतम्। चाणक्यकृतमर्थशास्त्रं विविधानि राजनीतिसन्दर्भान्तराणि च पञ्चतन्त्रकर्ता विलोकितवानिति निश्चितं भाति। नीतिशास्त्रस्य सिद्धान्तानां पशुकथाभि: सह महता चातुर्येण निश्रणात् किल तदोपदेशिकपशुपक्षिकथासाहित्यमुद्भुतम्, रूपविशेषो निखिलसंस्कृतवाङ्मये स्वसदृशान्तरसम्बन्धशून्य यस्य पञ्चतन्त्रे [2] विलोक्यते। पञ्चतन्त्रस्य सजातियान्तरं तु न वै लभ्यते।

आद्यं पञ्चतन्त्रम्-

**Corresponding Author:**
**डॉ० उमेश कुमार मंडल**
श्री बालेश्वर मंडल, गंगाराही, रजौर
रामभद्रपुर, ईलमासनगर,
समस्तीपुर, बिहार, भारत

1) आद्यग्रन्थस्य नामधेयम् दक्षिणापथीये नेपालीय च ग्रन्थे, वस्तुतो येषु येष्वपि ग्रन्थेषु नामधेयोल्लेखो लभ्यत तत्र सर्वत्र पञ्चतन्त्रमित्येव नामधयमवाप्यत। हितोपदेशऽपि 'पञ्चतन्त्रात् तयाऽन्यस्माद् ग्रन्थादाकृष्य लिख्यते' (भूमिकायां पद्यं इत्याद्युल्लेखषु पञ्चतन्त्रमित्येव नामधयं दृश्यता पञ्चतत्रक नाम पञ्चतन्त्रभूमिकायामपि एतत् नीतिशास्त्रं बालबोधनार्थ भूतले प्रवृत्तम्' इत्येवं पञ्चतन्त्रमिति नामधेयं पठ्यते। तस्मादाद्यस्य ग्रन्थस्य नामधेयं पञ्चतन्त्रं खल्वभूदिति सम्प्रधार्यते। तन्त्रपदेन हि, अत्राध्यायः परिच्छेदो वा ग्रन्थस्याभिप्रेत:। 'तन्त्रै: पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् इत्येवंविधन ग्रन्थास्य प्रमाणेनापि तावद् मतमिदं सम्थ्यते। अष्टाध्यायीप्रभृतिषु नामधेयषु सादृश्यमप्यस्य नामधेयस्य प्राप्यते। अपि नाम तन्त्रशब्द राजधर्म लोकव्यवहारज्ञानं चाधिकुर्वतोऽध्यायस्य वाचक: स्यात्। तन्त्रं नाम छलं इति यद् हर्टल महाशयेनोहितं तदसत्।
2) ग्रन्थस्य लोकप्रियत्वम् पञ्चतन्त्रस्य महती लोकप्रीतिभाजनताऽनेनैव स्फूटा यदस्यातिपञ्चाशद्भाषास्वतिद्विशतविविधसंस्करणानि लभ्यन्त पञ्चतन्त्रशाखिन एतावत: शाखाविस्तारस्य प्रायस्त्रिचतुर्थाशा भारताद् बहिः प्रसृताः। 1100 तमे खीष्टाब्दाश्च ग्रीक-स्पेनिश-लैटिनेटैलियन-जर्मन-पुरातनस्लैवौनिक-जैकाङ्गलभाषास्विद मनूदितं जातम्। अद्यत्वे आयवद्वीपात् आइसलैण्डपर्यन्तं खल्वस्य प्रचार: प्राप्यते।[3]

भारते तु चिरादधिकतरमस्य लोकप्रियत्वं प्रवर्तमानं प्राप्यते। एतद्धि अपभ्रंशादिषु प्राचीनासुहिन्दीप्रभृतिष्वद्यतनीपु च भाषास्वनूदितं भूत्वा भूयः संस्कृतभाषायामनूदितं दृश्यते। पद्यबद्धं रूपं भूत्वा पुनर्गद्यबद्धं रूपं जातम्। एतत् संकोचं विकासं चाप्तवान्। अस्य बहव्यः कथा: सर्वसाधारणजनकथारूपेण प्रचरिता भूत्वा पुन ऽद्यतनमौखिककथारूपेण सङ्गहीताः सन्ति। एवं 'भूतले धर्मग्रन्थान् विहाय लौकिकेन ग्रन्थान्तरेणैतावान् न लोकसमादरोऽधिगत:' इति वचनं कः प्रत्यवतिष्ठेत।[4]

3) पञ्चतन्त्रस्य नानाशाखा: अहा बत आद्यं पञ्चतन्त्रं कथासु केवलमवशिष्टम्! कीदृशं न्वाद्यस्य पञ्चतन्त्रस्य स्वरूपमासीदिति त्वस्य नानाशाखीयेरुपलभ्यमाने रूपैरंशतोऽनुमातुं सुशकम्। तेषां हि परस्परतुलया ज्ञायते यत्-

***क)*** तेषां सर्वेषां योनि: समाना (अन्यथा तपा गद्यखण्डेषु पद्येषु च प्राप्यमाणं प्रायिकमैकरूप्यं कथं नु समाधयं स्यात्।

***ख)*** अपि च, एषु रूपेषु ये दाषा दृश्यन्त त अनुस्त्रियमाणाः सन्त आद्यग्रन्थं प्रत्युपयन्ति। इति। अथ वक्ष्यमाणा ग्रन्था आद्यस्य पञ्चतन्त्रस्वरूपस्य विज्ञाने उपकुर्वन्ति–

1क) तन्त्राख्यामिका।
ख) 1100 तमख्रीष्टाब्दासनकाले केनचिद् जैनेन रचित: 'सरलग्रन्थ' इति संज्ञितः पञ्चतन्त्रग्रन्थः।
ग) उप 1199 तम ख्रीष्टाब्दे पूर्णभद्रप्रणीत: पञ्चतन्त्रग्रन्थः।
2क) दक्षिणापथीयं पञ्चतन्त्रम्।
ख) नेपालीयं पञ्चतन्त्रम्।
ग) हितोपदशः।
3) क्षमन्द्रण सामदेवन च प्रस्तुतं बृहत्कथागतं पञ्चतन्त्रवर्णनम्।
4) पहलवीभाषानिबद्धं पञ्चतन्त्रम्। सर्वपाश्चात्येषु देशेषु प्रचरितं पञ्चतन्त्रमेतत् पञ्चतन्त्रोपजीव्यकं खलु।

ऐर्जटन महाशयेन पञ्चतन्त्रसाहित्यस्यानुशीलने महान् आयास: खलु अर्जितः। तन्मेतन पञ्चतन्त्रस्य पूर्वोक्ता इमाश्चतस्र स्वतन्त्रशाखा: सन्ति। हर्टल मतेन तु केवलं द्वे एव।
यत् आद्यपञ्चतन्त्रस्वरूपस्य ज्ञानमेतन्मतद्वयभेदाश्रितं तस्मात् तदेतन्मतद्वयभेदा विशेषेणावधेयतां गच्छन्ति। तथाहि-
अ) हर्टलमते सर्वेषामुपलब्धानां पञ्चतन्त्रस्य नानारूपाणा विकृतिमापन्नं मूलं समानं, तच्च तेन 'त' इति संज्ञया व्यवहियते। ऐजर्टनमते तु कल्पनामात्रं खल्वेतत्।

आ) हर्टलमते आद्यमूलादनन्तरं मध्यमूलमप्येकमासीद् यस्मात्, तन्त्राख्यायिकां केवलां वर्जयित्वा, सर्वाणि शाखान्तराणि प्ररूढानि। एतद् मध्यमूलं तेन 'क' संज्ञा व्यवहृतम्। ऐजटर्नस्य (मते) तु आद्यमूलवदेतद् मध्यमूलमपि वक्तुर्मानसिकमबीजसर्गमात्रम्। हर्टलमते तत् तदव गद्यखण्ड पद्यं वा मौलिकं भवितुमर्हति यद् यत् तन्त्राख्यायिकायां वा 'क शाखाया: परोहेष्वेकस्मिन्नपि वोपलभ्यमानं स्यात्। ऐजर्टनमते तु स्वतन्त्रयोरुभयोः शाखयोरेकस्मिन्नपि संस्करण यद् यत् पद्य गद्यखण्डं वा लभ्यत तत् तन्मोलिकमव खलु, तन्त्राख्यायिकायां तस्य उपलम्भानुपलम्भौ अप्रयोजकौ।
ई) हर्टलस्य मत दक्षिणापथीयस्य पहलवीभाषामयस्य सरलग्रन्थसंज्ञितस्य च पञ्चतन्त्रस्य मूलभूतमुत्तरपश्चिमीयं यत् पञ्चतन्त्रमैजर्टनस्य मते तत्सद्भावे प्रमाणं नास्ति।

हर्टलन उत्तरपश्चिमीयसंज्ञकादेकस्माद् मूलाद् दक्षिणापथीय-पलवी-सरलग्रन्थेतिशाखात्रयविभक्तस्य पञ्चतन्त्रस्य या उत्पत्तिः कल्पिता न केवलं सैव तेषां परस्परसादृश्यानुशीलनाद् रूढित्रय्या इयं शाखात्रयी प्रादुर्भूतत्यपि च सिध्यति। यथा हर्टल: प्रतिपादयति यदि तथैकमूलोद्भूता दक्षिणापथीयपलवी-सरलग्रन्थेतिनाम्न्यस्तिश्रः शाखा:, तर्हि सरलग्रन्थ-तन्त्राख्यायिकयोमध्ये वा सरलग्रन्थ-पूर्णभद्रीयग्रन्थयोर्मध्ये वा तथा सादृश्यन न भवितव्यं' यथा पहलवी-'सरलग्रन्थयोर्मध्ये; अवस्था तु विपरीता खलु दृश्यते। पुनश्च हर्टल सिद्धान्तेन हितोपदेश-पूर्णभद्रीयग्रन्थयोर्मध्ये यथा साम्येनावश्यं भवितव्यं न तथा हितोपदेश-दक्षिणापथीयपञ्चतन्त्रयोर्मध्ये; चैवं दृश्यत तस्मादप्रामाणिक्यः खलु हर्टलवाचोयुक्तय इत फलितं भवति ।
4) प्रणता-विष्णुशर्मा नाम कश्चित् पण्डितो महिलारोप्याधिपतेर्नृपामरशक्तेस्त्रीन् पुत्रान् षड्भिर्मासै राजनीतिं शिक्षायितुं स्वीकृतवानिति तावत् पञ्चतन्त्रभूमिकाता ज्ञायते।[5] अत्र विष्णुशर्मा एव खल्वस्य सन्दर्भस्य प्रणता इति च स्पष्टमभिहितम्। पञ्चतन्त्रभूमिकास्थे तृतये पद्ये स्पष्टमभिहितम् । कल्पिता विष्णुशर्मणोऽस्य न कोऽपि आसाद्यते। भूमिकायां तेन नानादेवानां स्तवनादुदारमना ब्राह्मण: खलु स बभूव न तु जैनो वा बौद्धो वा इत्येतावदेव केवलमनुमातुं शक्यम्।
5) उद्भवस्थानम् आद्यपञ्चतन्त्रजन्मभूविषये न तावत् किमपि तात्त्विक विदितम्। मौलिक सन्दर्भ हस्तिसिंहयो मधेयस्यानुपलाभादुष्ट्रस्य चाभीक्ष्ण्यन वणनात् कश्मीरदेश: खल्वाद्यस्य पञ्चतन्त्रस्य जन्मभूरिति यद् हर्टलमहाशयन ताकत न तद् वस्तुतस्तर्कसहम्। कासांचिद् यात्राणां यानि नामधेयानि अत्रोपलभ्यन्ते, सर्वत्र भारते वर्षे तत्प्रसिद्धर्न तान्यपि कञ्चन पक्षं सुप्रतिष्ठियितुं क्षमाणि। महिलारोप्यनाथोऽमरशक्तिर्नाम नृपा न कर्तृकल्पनामात्रं चेत् तर्हिदाक्षिणात्यो नूनं पञ्चतन्त्रकर्तेत्यास्थीयेत। पञ्चतन्त्रेवर्ण्यमान ऋष्यमूको नाम पवता दक्षिणापथे स्थित इत्येतेनापि मतमिदं सम्यक् समर्थितं भवति।
6) रचनाकाल: दीनारो नाम रामनमुद्राविशेष: ग्रासदेशमार्गेण प्राच्यदशानागत:। यस्मिन् पञ्चतन्त्रीय पद्यऽस्य नामोल्लेखोऽस्ति तद् आद्यपञ्चतन्त्रान्तर्गतमिति विश्वस्यते। एवं गते खीष्टसंवत्सरप्रवर्तनादर्वाग्भवम्, 550 तम ख्रीष्टाब्दे बरजीयी महाशयेन पल्लवीभाषायामस्य रूपान्तरकरणात् ततो

बहुकालपूर्वभवं "संस्कृतसाहित्ये कथासाहित्यस्यावदानम् पञ्चतन्त्रमिति स्वीकृतम्। पहलवीपञ्चतन्त्रं सम्प्रति अलभ्यं 570 महाशायन सदपि तम ख्रीष्टवर्षे 'बूद' पुरातनसीरियाभाषायामनूदितं बभूव। तस्मात् ख्रीष्टस्य तृतीये वा द्वितीय एव वा शतक आद्यं पञ्चतन्त्रं प्रणीतं बभूवेत्यनुमीयते।

7) भाषा आद्यं पञ्चतन्त्रं संस्कृतभाषानिबद्धमासीदित्यत्र प्रायः सर्वेषां समीक्षकाणामैकमत्यं दृश्यते। यद्येवं न स्यात्, तर्हि यावदिदानी प्राप्तानां सर्वशाखाग्रन्थानां समानसंस्कृतैकभाषामयत्वं कथमुपपद्यत। अथ क्षत्रियराजकुमारशिक्षायै दृढसनातनधर्माविलम्बिना ब्राह्मणेनैतत् प्रणीतमित्यप्यस्माकं विदितम्। तत् कथं नु सम्भाव्यत यदीदृशो ग्रन्थः प्राकृतभाषायां विरचित: स्यादिति।

पञ्चतन्त्रे नानाविषयानधिकुर्वन्ति पञ्च तन्त्राणि सन्ति। प्रथम तन्त्रे भूमिकाया अनन्तरं सुहृद भेदो वर्णितः। अत्र चानजालरचनावत् कथाया कथान्तरसमावर्शन परमसौहार्दैन सुखमकत्र निकसत: पिङ्गलकनामधेयस्य सिंहस्य सञ्जीवकाख्यस्य वृपभस्य करटकदमनकाभ्या चतुरशृगालाभ्यामुत्पादितस्य दाहृदस्य कथा प्रकृता। सञ्जीवकवधानन्तरं तमनुशोचन्तं पिङ्गलकं चतुरवचनारचनैः सान्त्वयित्वा दमनकस्तस्य प्रधानसचिवः सञ्जात:।

मित्रसम्प्राप्तिनामके द्वितीये तन्त्रे कपातराजस्य चित्रग्रीवस्य, मूषकस्य हिरण्यकस्य, वायसस्य लघुपतनकस्य, हरिणस्य चित्राङ्गस्य क्रमेण सिद्धस्य मिथः सख्यस्य कथा वर्णिता सख्यबलेन च यथा यथा ते महान्ति दुर्गाण्युदतरन् तत्सर्वमाख्यातम्। द्वितीयं तन्त्रं प्रथमाद् रम्यतर भाति, 'यानि कानि च मित्राणि कर्तव्यानि शतान्यपि इत्येतस्मिन् वाक्ये चास्य निष्कृष्टार्थः सन्निहित इव दृश्यते।

## संदर्भ

1. संस्कृतसाहित्येतिहासः, पृष्टसंख्या–112
2. तत्रौव, पृष्टसंख्या–114
3. तत्रौव।
4. तत्रौव, पृष्टसंख्या–118
5. तत्रौव।